# २६ यद्यपि - तथापि, यावत् - तावत्, यदा - तदा

श्यामः - मित्र ! प्रचारकत्वं मास्तु इति गृहसदस्याः न उक्तवन्तः किम् ?

कृष्णः - **यद्यपि** ते तथा उक्तवन्तः **तथापि** अहं तत् न परिगणितवान् ।

श्यामः - इदानीं कथम् अस्ति गृहस्य स्थितिः ?

कृष्णः - **यद्यपि** पूर्वं तेषाम् असन्तोषः आसीत् **तथापि** इदानीं सर्वे सन्तुष्टाः सन्ति ।

शारदा - यः प्रचारकः भवति तस्य गृहे एतत् सहजम् । तदस्तु कृष्ण ! पानीयं किं ददामि ?

कृष्णः - भवती यत् ददाति तत् । **यावत्** ददाति **तावत्** ।

श्यामः - खाद्यम् अपि भवती **यावत्** ददाति **तावत्** खादति सः ।

कृष्णः - **यावत्** शक्यते **तावत्** खादामि । अविशिष्टं नयामि ।

*(पानीयसेवनस्य अनन्तरं गन्तुम् उद्युक्तः कृष्णः ।)*

शारदा - पुनः भवतः आगमनं कदा ?

श्यामः - **यदा** समयः भवति **तदा** । एवं ननु कृष्ण ?

कृष्णः - तथा न । **यदा** भवन्तः **स्मरन्ति** तदा ।

शारदा - वयं सर्वदा भवन्तं स्मरामः एव ।

कृष्णः - तर्हि **यदा** तीव्रं स्मरन्ति **तदा** ।

श्यामः - सर्वम् एतत् मिथ्यावचनम् । प्रचारकस्य भवतः अत्र आगमनार्थं समयः कथं भवेत् ?

कृष्णः - अलं चर्चया । **यदा** खाद्यखादनेच्छा भवति **तदा** भगिनीं स्मरिष्यामि । **यदा** भगिन्याः स्मरणं भवति **तदा** अत्र आगमिष्यामि । अस्तु, मम विलम्बः जातः । आगच्छामि तावत् ।

## विशेषः

* **यदा - तदा**

'यदा - तदा' इत्येतत् युगलं कालं प्रदर्शयति । 'यदा' इति यत्र प्रयुज्यते तत्र 'तदा' इति शब्दः अपि प्रयोक्तव्यः ।

उदा - **यदा** अहं भवतः गृहम् आगतवान् **तदा** भवान् गृहे न आसीत् ।

* **यावत् - तावत्**

'यावत् - तावत्' इत्येतत् युगलम् अवधिं (दैर्घ्यं कालं च) सूचयति । 'यावत्' इत्यस्य प्रयोगः कृतः चेत् 'तावत्' इत्यपि प्रयोक्तव्यम् एव ।

उदा - भवान् **यावत्** इच्छति **तावत्** स्वीकरोतु ।

* **यद्यपि - तद्यपि**

'यद्यपि - तथापि' इत्येतयोः अपि सहैव प्रयोगः करणीयः ।

उदा - **यद्यपि** धनम् अस्ति, **तथापि** सः दानं न करोति ।

**अभ्यासः १०**

धर्मेन्द्रः विस्मरणशीलः । सावित्री तस्य पत्नी । सा पत्युः अनुकूला । पत्युः विस्मरणशीलताम् अवगच्छन्ती सा सदा साहाय्यं करोति । पतिः कुत्र गच्छति इति, सावित्री तस्मै किं ददाति इति च अधः निर्दिष्टम् अस्ति । तदाधारेण 'यदा - तदा' इत्येतेन युक्तानि वाक्यानि लिखत ।

| | |
|---|---|
| १. क्षीरकेन्द्रम् | क्षीरपात्रम् |
| २. आपणः | स्यूतः |
| ३. वायुविहारार्थम् | दण्डः |
| ४. स्नानार्थम् | प्रोञ्छः |
| ५. दन्तधावनार्थम् | दन्तकूर्चः |
| ६. कार्यालयः | लेखनी |
| ७. ग्रन्थालयः | उपनेत्रम् |
| ८. पठनार्थम् | काफीपानीयम् |

| | |
|---|---|
| ९. प्रवासार्थम् | यानपेटिका |
| १०. उद्यानकार्यार्थम् | खनित्रम् |
| ११. क्रीडार्थम् | क्रीडासाधनम् |

उदा - १. **यदा** धर्मेन्द्रः क्षीरकेन्द्रं गच्छति **तदा** सावित्री क्षीरपात्रं ददाति ।

२. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

३. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

४. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

५. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

६. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

७. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

८. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

९. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

१०. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

११. ....... धर्मेन्द्रः ....... ....... ....... सावित्री ....... ....... ।

**अभ्यासः ९१**

रिक्तानि स्थानानि **'यदा - तदा'** इत्येतेन **'यावत् - तावत्'** इत्येतेन, **'यद्यपि - तथापि'** इत्यनेन वा पूरयत ।

उदा - मित्र ! सुरेशः कीदृशः ?

सः ....... वदति ....... कार्यं न करोति ।

सः **यावत्** वदति **तावत्** कार्यं न करोति ।

१. एतत् कार्यं कः कृतवान् ?

प्रकाशः कृतवान् । ...... तस्य शिरोवेदना आसीत् ...... सः कृतवान् ।

२. जनाः फलं कियत् प्राप्नुवन्ति ?

ते कार्यं ....... कुर्वन्ति, फलं ....... प्राप्नुवन्ति ।

३. एतत् कार्यं किमर्थं न कृतवान् भवान् ?

विस्मृतवान् आसं भोः । ..... माता स्मारितवती ...... स्मृतवान् अहम् ।

४. कियद्दीर्घं भाषणम् आसीत् तस्य ?

....... जनाः न उत्थितवन्तः ....... भाषणं कृतवान् सः ।

५. चायं किं न पीतम् ? कोषे किं धनं न आसीत् ?

....... मम कोषे धनम् आसीत् ....... चायं न पीतवान् अहम् ।

६. अस्माकं गृहम् आगन्तुं न इच्छति वा भवान् ?

'आगन्तव्यम्' इति ....... इच्छा अस्ति ....... समयाभावतः आगन्तुं न शक्नोमि ।

७. एषः देवनागरीलिपिं जानाति किम् ?

न । ....... एषः न जानाति ....... ऊहां कृत्वा वाक्यानि पठति ।

८. एषः सेवकः कथम् अस्ति ?

....... वदामः ....... एव करोति । ततोऽपि न किञ्चिदधिकम् ।

# २४ स्म

श्रीपादः - शङ्कर ! सप्ताहात् पूर्वं पुरन्दराचार्यः दिवङ्गतः इति वार्ता ।

शङ्करः - एवम् !! महत् वार्धक्यम् आसीत् खलु तस्य ? बहु सम्यक् पाठयति **स्म** सः ।

श्रीपादः - किन्तु भवान् तु न पठति **स्म** ।

शङ्करः - आम् । तत् तु बाल्यम् । वयं शालाम् अगत्वा आम्रफलानि खादामः **स्म** । अरण्ये अटामः **स्म** ।

श्रीपादः - कक्ष्यायां वयम् अनुपस्थिताः इति भगिन्यः गृहं गत्वा वदन्ति **स्म** । तदा गृहसदस्याः तर्जयन्ति **स्म** ।

शङ्करः - भवन्तं तु गृहजनाः तावत् न तर्जयन्ति **स्म** ।

श्रीपादः - आम् ! अहं रात्रौ पठामि **स्म** । अतः प्रथमश्रेण्याम् उत्तीर्णः भवामि **स्म** ।

शङ्करः - स्मरणीयानि दिनानि तानि । ते हि नो दिवसाः गताः ।

## विशेषः

*** स्म**

वर्तमानकालिकक्रियापदेन सह 'स्म' इत्येतत् यदा युक्तं भवति तदा भूतकालार्थः दृश्यते । तात्कालिकभूतकालार्थे एतादृशः प्रयोगः विशेषतः क्रियते ।

उदा - १. श्रीरामः अरण्ये सञ्चरति स्म ।
२. राक्षसाः जनान् पीडयन्ति स्म ।
३. बाल्ये अहं सर्वदा क्रीडामि स्म ।

**अभ्यासः - ८६**

श्रीकण्ठः इदानीं मध्यवयस्कः । सः कदाचित् विरामकाले बाल्यस्य घटनाः स्मृतवान् । बाल्यस्य क्रियाः वर्तमानकाल-प्रथमपुरुषैकवचने निर्दिष्टाः सन्ति । तासां योग्यं रूपं ज्ञात्वा 'स्म' योजयित्वा रिक्तानि स्थलानि पूरयत ।

उदा - बाल्ये अहं प्रातः अष्टवादने (उत्तिष्ठति) -------- ।
बाल्ये अहं प्रातः अष्टवादने उत्तिष्ठामि स्म ।

**मम बाल्ये -**

१. अहं नद्यां (तरति) .......................... ।

२. माता मां बहुधा (तर्जयति) .......................... ।

३. कक्ष्यायाम् अहं प्रथमं स्थानं (प्राप्नोति).......................... ।

४. अध्यापकाः मम प्रशंसां (करोति) .......................... ।

५. वयं सर्वे तिन्त्रिणीवने (क्रीडति) .......................... ।


६. गृहात् खाद्यानि आनीय वयं वने (खादामि) .......................... ।

७. मातामही रमणीयाः कथाः (वदति) .......................... ।

८. बालाः वयं श्रद्धया (शृणोति).......................... ।

९. रात्रौ स्वप्ने पिशाचाः भयं (जनयति) .......................... ।

१०. वयं महिषीभिः सह अरण्यं (गच्छति) .......................... ।



अभ्यासः - ८७

चन्द्रकान्तः बाल्ये किं किं करोति स्म ?

१. बहुनिद्रा २. सम्यक् पठनम् ३. देवस्य पूजा ४. वृक्षारोहणम् ५. पयोहिम-खादनम् ६. प्रवासः ७. सङ्गीताभ्यासः ८. योगासनम् ९. मातृसेवा १०. तुलसीपूजा ११. देवध्यानम् १२. सस्यानां वर्धनम् १३. मूल्याङ्कसङ्ग्रहः १४. पत्रिकाविक्रयणम् १५. अन्येषाम् उपहासः ।

| उदा - १. चन्द्रकान्तः बाल्ये बहुनिद्रां करोति स्म । |
|---|

२. चन्द्रकान्तः बाल्ये ............................................ ।

३. ............................................................ ।

४. ............................................................ ।

५. ............................................................ ।

६. ............................................................ ।

७. ............................................................ ।

८. ............................................................ ।

९. ............................................................ ।

१०. ............................................................ ।

११. ............................................................ ।

१२. ............................................................ ।

१३. ............................................................ ।

१४. ............................................................ ।

१५. ............................................................ ।